श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

॥ श्रीहरिशरणाष्टकम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीहरिशरणाष्टकम् ॥

ध्येयं वदन्ति शिवमेव हि केचिदन्ये
शक्तिं गणेशमपरे तु दिवाकरं वै।
रूपैस्तु तैरपि विभासि यतस्त्वमेव
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ 1 ॥

नो सोदरो न जनको जननी न जाया
नैवात्मजो न च कुलं विपुलं बलं वा।
सन्दृश्यते न किल कोऽपि सहायको मे
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ 2 ॥

नोपासिता मदमपास्य मया महान्त -
स्तीर्थानि चास्तिकधिया न हि सेवितानि।
देवार्चनं च विधिवन्न कृतं कदापि
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ 3 ॥

दुर्वासना मम सदा परिकर्षयन्ति
चित्तं शरीरमपि रोगगणा दहन्ति।
सञ्जीवनं च परहस्तगतं सदैव
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ 4 ॥

पूर्वं कृतानि दुरितानि मया तु यानि
स्मृत्वाऽखिलानि हृदयं परिकंपते मे।
ख्याता च ते पतितपावनता तु यस्मात्
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ 5 ॥

दुःखं जराजननजं विविधाश्च रोगाः
काकश्वसूकरजनिर्निरये च पातः।
ते विस्मृतेः फलमिदं विततं हि लोके
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ **6**॥

नीचोऽपि पापवलितोऽपि विनिन्दितोऽपि
ब्रूयात् तवाहमिति यस्तु किलैकवारम्।
तं यच्छसीश निजलोकमिति व्रतं ते
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ **7**॥

वेदेषु धर्मवचनेषु तथागमेषु
रामायणेऽपि च पुराणकदंबके वा।
सर्वत्र सर्वविधिना गदितस्त्वमेव
तस्मात् त्वमेव शरणं मम शङ्खपाणे॥ **8**॥

॥ इति श्रीहरिशरणाष्टकं समाप्तम्॥